International Journal of Sanskrit Research 2022; 8(3): 209-213

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(3): 209-213
© 2022 IJSR
www.anantaajournal.com
Received: 05-03-2022
Accepted: 07-04-2022

डॉ. सन्तोष कुमार झा
सहायकाचार्य, बालाजी कॉलेज ऑफ एजुकेशन, फरीदाबाद, हरियाणा, भारत

Corresponding Author:
डॉ. सन्तोष कुमार झा
सहायकाचार्य, बालाजी कॉलेज ऑफ एजुकेशन, फरीदाबाद, हरियाणा, भारत

# शिक्षाशास्त्रे नैतिकविकासः

डॉ. सन्तोष कुमार झा

सारांश:
पुराकाले अस्माकं देशे तत्सव गुरुकुलमासीत्। विद्यालयविहीना पाठशाला आसीत्। अनुभवे नीत्यनुगुणं प्रापयति स्म। तत्र मातापितुः संस्कारोऽपि तान् पूर्वं प्रापयन्ति स्म। तावेव ते गुरुकृपया क्रियान्वितं विकसितं च कुर्वन्ति स्म। रुच्यानुगुणं ते विविधेषु विषयेषु उन्मुखं भूत्वा सत्यान्वेषणं ज्ञानस्य परिष्कारञ्च कुर्वन्ति स्म। परं वैदेशिकशिक्षापद्धतयः व्यर्थप्रमाणिता जाता। अत्र स्वदेशे अस्याः शिक्षायाः हीनता विदेशे च उच्चता भावस्य जागरणं जातम्। तेनैव आधुनिकी शिक्षा मानवान् नैतिकविषये विमुखं करोति। एँ शिक्षापद्धतौ नैतिकताया अभावकारणात् जातमित्येव लक्षयति। आधुनिकपरिप्रेक्ष्ये बहवः छात्राः शिक्षितजनाश्च लोकव्यवहारात् अपरिचिताः सन्ति। सर्वत्र तेषां अनुभवहीनज्ञानम् अपूर्णशिक्षा संस्काररहिताचरणञ्च दृष्टिगोचरो भवति। आधुनिकशिक्षा सिद्धान्तेषु आधारिता वर्तते या जगज्जीवनयोः तादात्मयस्थापितं नैव कर्तुं शक्नोति। मातापितरौ एव बालकानां प्रथमो गुरुः यस्य प्रथमशिक्षा गृहे एव संस्कारस्य शिक्षा दातव्यम्। परं मातापितरो एव संस्काराभावः आदर्शजीवने कर्माभावाश्च। सम्प्रति अस्या मानवताया एव आधुनिकसन्दर्भे नवीनसन्दर्भे च मूल्याङ्कनमावश्यकं वर्तते। मानवतायाः पृष्ठभूमौ अनुकूलशिक्षा एव अस्मान् विकसयति। नैतिकशिक्षायाः अभावे आत्मिकोन्नतिः नैव भवितुमर्हति तथा च मानवः पूर्णरूपेण विकासपथि नैव अग्रसरन्ति। अस्मिन् सन्दर्भे राष्ट्रिय शिक्षा आयोगः (1964-66)विद्यालयीय पाठ्यक्रमे प्रमुखो दोषः वर्तते अत्र सामाजिकनैतिक-आध्यात्मिकमूल्यशिक्षाया अनुपस्थितिः। यदि वयं स्वशिक्षा- संस्थाभ्यः नैतिकशिक्षा-आध्यात्मिकप्रशिक्षणञ्च पृथक्कुर्मः तर्हि वयं ऐतिहासिक- विकासस्य कार्यं कुर्मः। व्यक्तेः नैतिकव्यवहारमनेकाः जैविककारकाः सामाजिकार्थिकपृष्ठभूमीनां तथा बौद्धिकक्षमतादयः प्रभावयति। परिवारः तथा विद्यालयस्य सहयोगः बालकानां समूहस्याध्ययनं व्यापकानुभवः सनातन- मूल्यानाम्प्रति सम्मानं तथा मानवकल्याणस्य भावनायाः विकासः अस्यां दिशायां महत्त्वपूर्णयोगदानकर्तुं शक्नोति। अतोऽत्र को नैतिकशिक्षाविकासः ? तस्य लक्षणानि, परिभाषा तथा च कस्मै कृते आवश्यकमित्यादीनां विमर्शोऽस्मिन् शोधपत्रे अग्रे भविष्यतीति शम्।

सङ्केतशब्दाः गुरुकुलम्, समाजः, आयोगः, शिक्षापद्धतिः, मनोविज्ञानञ्चेति।

## प्रस्तावना:

यस्मिन् देशे विभिन्न संस्कृतिः, जाति-सम्प्रदाय एवं विचारधारा धारिणः जनाः निवसन्ति तत्रत्या बालकानां नैतिकविकासः समदृष्ट्या कुर्युः। तत्र अतिकठिना समस्या प्रत्यक्षं समुदेति। नवजात शिशून् अस्माभिः नैतिकहीनः कथितं शक्यते। येषां नैतिकतायाः किमपि बोधः न वर्तते। प्रारम्भे बालकः स्व आवश्यकता एवं इच्छानां पूर्तौ संलग्नः भवति। आवश्यकतानां पूर्तिं समये यदा कदा तं दण्डमपि मिलति। एतेन तथ्याधारेण बालकः समीचीनम् असमीचीनं, नृत-अनृतं, नैतिक-अनैतिकादीनां परिचयं कुरुते। सहैव प्रत्येकं बालकः समूहे वासमिच्छन्ति। अत एव स्वसमाजस्य मानदण्डं तथा नियमानां पालनं करोति।

## नैतिकविकासस्यावस्था

सम्प्रति सामाजिक-स्थितौ नैतिकशिक्षायाः समस्या एका ज्वलन्तोदाहरणम् अस्ति। अस्माकं प्राचीनसमय इत्थमासीत् यदा शैशवान् नीतेः शिक्षा न प्रदाय सहज पर्यावरणेन तान् शिक्षा सम्मिलति स्म। अर्थात्

अभित्यज्यते यत् वातावरणादेव तान् शिक्षा मिलति स्म। अद्य मत्समक्षे बालकानां जीवनं तथा व्यवहारं सुरक्षितं स्थापयितुं तेषां नैतिक शिक्षायै चिन्तनमावश्यकं भवति।

यथा- 'सत्यं वद' अस्माकं धर्मोऽस्ति किञ्च यदा व्यवहारेऽपि सत्यभाषणस्य पालनं स्यात् तर्हि स्वैव नैतिकता वर्तते। राष्ट्रपिता महात्मागान्ध्यनुसारेण - मह्यं सदाचार: नैतिकता तथा धर्मे मात्र रूपान्तरमस्ति। पाश्चात्यविद्वान् स्प्रिंगमहोदयानुसारेण- 'धर्म विना नैतिकता तथा नैतिकताया: अभावे धर्मस्य किमपि अस्तित्वं नास्ति।'

बालकस्य नैतिकविकाससम्बन्धे अनेकेषां विद्वद्जनानां मतानि -

1. बोरापस स्मिथ: ग्रोइंग माइण्डसेन त्रयोवस्था उद्घोषिता-

क. प्रथमावस्था - विनय: तथा आज्ञाकारिता।

ख. द्वितीयावस्था - नैतिकनियमानां भावनाया: विकास:।

ग. तृतीयावस्था - समायोजनं यस्याधारोपरि बालक: ग्राह्याग्राह्यं निर्णयति।

2. ब्रीटिसस्वेन्सन - अस्यानुसारेण नैतिकविकासस्य त्रयोवस्था वर्तन्ते-

क. शैशवावस्था - (जन्मत: पञ्चवर्षपर्यन्तम्) अस्मिन् समये माता-पिता नैतिकताया: पाठं पाठयति।

ख. बाल्यावस्था - (अष्टवर्षाद् द्वादशवर्षपर्यन्तम्) अष्टवर्षादारभ्य द्वादशवर्षपर्यन्तं सुहृद्मित्रादि नैतिकताया: निर्धारणे साहाय्यं भवति।

ग. किशोरावस्था - (त्रयोदश वर्षादारभ्य एकोनविंशतिवर्षपर्यन्तम्) अस्यामवस्थायां नैतिकनियमान् खण्डणे आनन्दानुभवं करोति। अस्मिन् बालके नैतिकविकासदृष्ट्या परेषां रक्षा सामाजिकं प्रमोत्पादयति।

3. गैसेलस्य मतानुसारेण - नैतिक विकासस्य त्रयोवस्था वर्तते-

अ. प्रथमावस्था जन्मत: पञ्च वर्षाणि यावत् भवति।

आ. द्वितीयावस्था - षड्वर्षादरभ्य दशवर्षपर्यन्तमुद्घोषित:। अस्मिन् बाल: स्वमातृ-पितृ प्रभावादेव उचितानुचितवार्ताणामवबोधयति।

इ. तृतीयावस्था - एकादशवर्षाद षोडशवर्षपर्यन्तमुद्घोषित: अस्या: अवस्थाया: बालक: स्व स्वतन्त्रसत्तामिच्छन्ति। अत: स स्वीये आन्तरिक विचाराणामाधारोपरि नैतिकतां प्रति वर्द्धति।

बान्द्रा तथा वाल्टर्स

वान्द्रामहोदयेन सामाजिक्रिया: सामाजिककरण तथा च व्यक्तिगत-सिद्धान्तानां विकासहेतु: सामाजिकव्यवहारोपाय: प्रतिपादित:। स निर्दिष्ट: यत् सामाजिकरणस्य सदस्यानां प्रदर्शनेन नैतिकविकास:।

निर्णय: स्पष्टरूपेण अवबोधितो भविष्यति। तेषामनुसारेण अनुकूलप्रति-बिम्बविभिन्नस्थितो नैतिकताया: व्यवहारे अनुकूलता प्रदर्शयति।

कार्लरोजर्स - प्रतिव्यक्ते: किशोरावस्थानां व्यक्तिगतमूल्यानां विकासेभ्य सम्भाव्य प्रोत्साहितसमयोस्ति। यदि स्थिति: अनुकूल: स्यात् तर्हि अयमेव समयोस्ति, यदाबालक: आत्मनिर्भरतां शिक्षयति। स्वकृते उचितानुचितस्य उत्कृष्टनिर्नेतारूपे मूल्येषु विकास: स्वस्योपरि विश्वसति। रोजर्समहोदयेन परिपक्वमूल्यप्रणालीव्यवस्थाया: विकासं तिस्र अवस्था निम्नलिखितप्रकारेण प्रतिपादित:।

प्रथमावस्था - जीवनस्य प्रथममासे द्रष्टुं शक्यते। अवस्थायामस्यां शिशो: मूल्यप्रणाल्यतिकोमल: तथा पर्याप्त भवति। यदा तस्य वातावरणं तस्यानुकूलं न स्यात् तदा स एकाकी स्यात् श्रान्तो वा स्यात् तर्हि स रोदति किञ्च शिशो: मूल्यं बहुविस्तृतं तथा च पर्याप्तं न भवति।

द्वितीयावस्था - द्वितीयावस्थायां येन यथा स वर्द्धते श्रेष्ठस्य स्नेहं तथा तस्य सम्मतिं अवबोधयति। बहवोऽपि जना: चिन्तनं विना ग्रहीतमन्येषां मूल्योपरि निर्भरो भूत्वा अस्यामवस्थायां निवसति।

तृतीयावस्था - प्रतिव्यवर्तये किशोरावस्थायां स्वमूल्यमनोवृत्तौ च एकांकीकरणस्य तस्य पुनर्मूल्याङ्कनकरणस्यास्ति। किञ्चिदेव व्यक्ति: भाग्यशाली भवन्ति य: उच्चतरमूल्यै: सह ओत-प्रोत अव्यस्थाया उपरि भवितुं शक्नोति तस्य योग्यता तथा अनुभवस्याधारेव स्वावश्यकतानामरूपमतिकोमल- मूल्यदर्शनं पुन: प्रार्थयति। य: तस्य जन्म समये आसीत्। रोजर्समहोदयस्य व्यक्ति अस्या अनिश्चितताया संसारे विचलितुं सन् स्थिरं कर्तुं शक्नोति।

नैतिकविकासस्य सिद्धान्ता:

नैतिक-विकास: मानवविकासस्य महत्त्वपूर्णपक्ष: वर्तते। नैतिकाविकास: सा प्रक्रिया भवति यत्र व्यक्ति: उचितानुचितयो: मानदण्ड चिन्तयित्वा स्वीकरोति। नैतिकविकासस्य त्रय: प्रमुखा: सिद्धान्ता: प्रस्तुतास्सन्ति।

1. मनोविश्लेषणम् 2. सामाजिकोऽधिगम: 3. ज्ञानात्मिकादृष्टि:

एते त्रय अवधारणा एवं ज्ञापयति यत् कथा आन्तरिकप्रक्रियया बाह्यमानदण्ड: आन्तरिकमानदण्डत्वे परिवर्तते।

मनोवैज्ञानिकविश्लेषणम्

विवेक: तथा मूल्यानां विकास: सामाजिकरणस्य प्रक्रियायां त्वरितैव आरम्भो जायते। बाल्यावस्थायां शिशून् मिथ्याभाषणम् अथ च वस्तुमगोपनस्य शिक्षा प्रदीयते। अयं प्रारम्भिकनैतिकशिक्षा एक: परिपक्व: किशोरस्य मूल्यानां विकासस्य प्रक्रियात् भिन्नोभवति।

बहवोऽपि मनोवैज्ञानिकानां विश्वसोऽस्ति। यत् प्रतिरूपेणप्रक्रियया पुरस्कार तथा दण्डस्य बोधो जायते। तथा च प्रक्रियेयं कनिष्ठबालकान् नृतानृतयो: पृथकताया: बोधं कारयति। प्रक्रियेयमनवरतं प्रचलति। तया तेषां शिशूनामुपरि यत् पश्चाद् समये तान् गृहणाति बाह्यनैतिकतामारोपेन सन्तुष्टो जायते। परिपक्वता प्राप्ता कश्चित् व्यक्ति मूल्यानामेकं व्यवस्थितसंकलननिर्मातुम् अन्ततोगत्वा एतान् सिद्धान्तान् विश्लेषयित्वा स्वीकार्यं भवति।

सामाजिकोऽधिगम:

किशोरावस्थाया: बालक: स स्वस्य मूल्यानां मूल्यप्रणालीनिर्माणे निर्धारणे वा असमर्था जायते। यतोहि स निर्माणेव वाञ्छतिस्म। अनुभवात्मकसिद्धान्तवादिन: अयं मन्यते यत् प्रत्येकं व्यक्तिं तादृशी योग्यता धारणीया। येन स स्व विवेकेन अयं निर्णेतुं सक्षमो स्यात् यत् सत्यनैतिकमूल्यानां दर्शनं किमस्ति। पञ्चदशवर्षस्य बाल: स्व-स्वस्य सिद्धान्तान् निर्माणहेतु: साधारणत: नैतिकक्षमतावानमुपरि विमर्शं स्यात्। स एतत् योग्यं भवितव्यं तेन तस्य कारणता तथा प्रभावपूर्णतर्कै: सम्भाव्यता एवञ्च प्रभावोपरि पूर्णरूपेण विमर्शस्य योग्यता किशोरावस्था वा तस्य

पश्चादावस्था पर्यन्तं न विकसितं भवितुमर्हति। अथ च यदा-कदा तु कश्चिदपि अवस्थायां न समायाति। मनोवैज्ञानिकै अनुमानतः पञ्चाशत् वर्षाद् अधीयते। नैतिकमूल्यानां विकासस्य सम्बन्धः तथा प्रक्रियास्ति येन बालका उचितानुचित सम्यकासम्यक् सिद्धान्तेषु पृथक् करणे समर्थयति। 'शो' इत्यस्य नैतिकमूल्यानां विकासे अधिकरूपेण ध्यानं नैतिकं विवेक एवं नैतिकचरित्रस्य विकासे वसति।

ते सिद्धान्ताः येन बालः केन प्रकारेण शिक्षितः तेन नैतिकपरिणामः व्यवहार एवञ्च अङ्गसज्यारादीनां निर्माणे जायते। अथ च केन तस्य स्तरं स्वीकरोति। एते सर्वे नैतिक विवेकान्तर्गते समायाति। नैतिकचरित्र परिस्थिति- जन्यावश्यकता नीतिशास्त्रसम्बन्धी गतिविधिषु वास्तविकव्यवहारं प्रदर्शयति। प्रथमं ज्ञानमेव विवेकसम्बन्धिनिर्णयप्रक्रियां स्वीकरोति। यतोहि अन्यः असामान्य- विशिष्टो वा सामाजिकपरिस्थितिषु विशिष्टव्यवहारं प्रदर्शयति।

ज्ञानात्मिकादृष्टिः

ज्ञानात्मकविकासस्य क्षेत्रे जीनप्याजे तथा कोलवर्गस्य कार्याणामत्यधिकं महत्त्वं विद्यते। प्याजेमहोदयस्य बालकानां मनसः अध्ययनं कृत्वा ज्ञातुं प्रयतितः यत् बालकस्य ज्ञानं कथं विकसति। सः ज्ञानात्मकं विकासस्य अवस्थात्रयं प्रतिपादितवान्। प्याजेमहोदयस्य मुख्योद्देश्यं बालकानां नैतिकनिर्णयकृतीनामस्ति। कोलवर्गस्य सिद्धान्तः प्याजेमहोदयस्य बालकानां नैतिकनिर्णयकृतिज्ञानमस्ति। कोलवर्गस्य सिद्धान्तः प्याजेमहोदयस्य इव समर्थयति यत् नैतिकविकासः एकस्मिन्क्रमे भवति। तेन नैतिकविकासस्य स्तरत्रयं बोधितं तथा च भागद्वये विभाजितम्।

जीनप्याजेमहोदयेन स्वसिद्धान्तं द्विधा विभक्तवान् -

1. प्याजेमहोदयेन स्वनैतिकविकासस्य सिद्धान्तः बालकैः लघुवार्तासु लघुकथासु च नैतिकप्रश्नं पृष्ट्वा एवञ्च तस्य नैतिकतर्कं श्रुत्वा प्रतिपादितः। स नैतिकतां बालकानां सामाजिकनियमं समानता एवञ्च जनं प्रति न्यायस्य भावनायाः रूपे दृष्टः। स ज्ञातवान् यत् सामाजिकनियमानां ध्यानसम्बन्धिताकृतिः माता-पिता एचञ्च अन्येषां श्रेष्ठजनानां तथा प्रभावोत्पादकव्यक्तीनां प्रभावः बालान् प्रभावयन्ति।
2. बालकेषु न्यायिकभावना-सामाजिकानुभवद्वारा प्रापयति। प्याजेमहोदयेन प्रदत्तः 4-12 वर्षस्य आयुः वर्गस्य बालकेषु तर्कशीलतायाः अन्वेषणेषु नैतिकविकासस्य उभयोः अवस्थयोः अन्वेषणं कृतः। प्रथम एवञ्च प्रारम्भिकावस्थायां स हैदरोनोमस नैतिकता बाह्यनैतिकता वा उद्घोषितः यः अन्येन प्रदर्शितनैतिकनियमं प्रति कर्तव्यपालनमासीत्। यथा च 4-7 वर्षस्य आयुवर्गे दृष्टवान्।
3. द्वितीयावस्थायां स स्वनियन्त्रितावस्था आन्तरिकनैतिकतावस्थां कथितवान्। यः 10-12 वर्षस्य मध्यस्य आयुवर्गस्य बालकानां मध्ये पारस्परिक सम्बन्धेः उत्पद्यते। यस्यां बालकः विकसति अथ च आन्तरिक नैतिक नियमान् मन्यते।

जीनप्याजेमहोदयानुसारेण षड्वर्षात् द्वादशवर्ष यावत् विकासस्य चत्वारः प्रमुखाः अवस्थाः वर्तते।

अ. प्रथमावस्था - अस्मिन् समये बालकः आत्मकेन्द्रितो भवति स श्रेष्ठाणां विरोधं न करोति।

ब. द्वितीयावस्था - अस्यामवस्थायां बालकमनैतिकमन्येतुं बाध्यं क्रियते।

स. तृतीयाावस्था-अस्यां बालकं समाजद्वारा निर्दृष्टसम्यक् असम्यक् उचितानुचितनैतिकानैतिक-कार्याणां तथा नियमानां पालनं भवति।

द. चतुर्थावस्था - अस्यामवस्थायां बालकः साम्यवादी भवति। बालकः अस्मिन्समये मानवताद्वारा निर्मितं प्रेमसहानुभूत्यादि नैतिकनियमानानुसारेण चलति।

वर्तमान समये प्याजेन निर्दिष्टं नैतिकविकासस्य अवस्था अतिमहत्त्वपूर्णं मन्यते। अस्यां दिशायां कोहलवर्गेन अन्यञ्चाप्योपयोगी विस्तृत-रूपेण मानवजीवने नैतिकविकासस्य चर्चा कृतः। कोहलवर्ग नैतिकविकासात् षड् अवस्थायामभिव्यक्तितः।

1. पूर्वलोकसम्मतस्तरः

क. दण्डपुरस्कारोपर्याधारितः

ख. आत्मकेन्द्रितोपर्याधारितः

2. लोकसम्मतस्तरः

ग. शोभन बालक/बालिकोपर्याधारितः

घ. नियमव्यवस्थोपर्याधारितः

3. उत्तरलोकसम्मतस्तरः

ङ. सामाजिकानुबन्धनियमव्यवस्थोपर्याधारितः

च. सिद्धान्तनिरुपणोपर्याधारितः

नैतिकमूल्यानां तत्त्वः

द्वितीयावस्थायामागत्य बालकस्य अवस्था (अङ्ग) इत्योपरि केन्द्रितो न भवति अपितु बाह्यकेन्द्रितो भवति।

संस्थागत तथा सार्वभौमिकः

अयं नैतिकविकासस्य अन्तिमतथ्यमस्ति। यस्यां किशोरकिशोरीणां नैतिकदृष्टिकोण विस्तृतरूपेण वर्द्धयति।

कोहलवर्गेनः प्रस्तुतपूर्वोक्तवर्णितनैतिककविकासस्य विभिन्नस्तराणां तथा सोपानानामवलोकनेन स्पष्टो भवति यत् स्तराः तथा सप्त सोपनानि नैतिक निर्णयेतुं वर्द्धमाना योग्यता तथा दृष्टिः वर्द्धमाना व्यापकता अमूर्त्ततां वा सूचयति। प्रथमस्तरे बालकः आत्मेकेन्द्रितो भवति। अस्य तिर्यग् तृतीयस्तरे व्यक्तिः बाह्यकेन्द्रितो जायते। अथ च ते निष्पक्षभावेन अन्येषां व्यक्तीनां सम्बन्धे विमर्शस्य योग्यतां विकसयति।

जीनप्याजे तथा कोहलवर्गेनः प्रस्तुतनैतिकविकासस्य सोपानेषु सम्बन्धो प्रतीयते येषां निम्नाङ्कितितालिकारूपेण प्रस्तुतमस्ति।

नैतिकविकासस्य सोपानेषु सम्बन्धः

| जीनप्याजेमहोदय/कोहलवर्गमहोदयानुसारमात्मकेन्द्रितनिर्णयः | |
|---|---|
| 1. नैतिकयथार्थता | 1. दण्डः तथा आज्ञापालनाभिमुखता |
| 2. नैतिकसमानता | 2. यान्त्रिकसापेक्षिताभिमुखता |
| 3. नैतिकसापेक्षिता | 3. परस्पर एकरूपाभिमुखता |
| 4. अधिकारसंरक्षणाभिमुखता | |
| 5. सामाजिकनुबन्धविधिसम्मताभिमुखता | |

6. सार्वभौमिकनैतिकसिद्धान्ताभिमुखता

कोहलवर्गेन नैतिकविकासस्य त्रयोस्तरानुरुपैव नैतिकनिर्णयानां त्रयः तथ्यमुद्घोषितः।

नैतिकमूल्येभ्यो सम्बद्धनिर्णयः
नैतिक निर्णयाणामस्य तथ्यान्तर्गते बालकः उचितानुचित-निन्दा-स्तुति-दण्ड-पुरस्कार-सम्यकासम्यकानामाधारोपरि कार्यं करोति।

कोहलवर्ग-लारेन्समहोदयः नैतिकविकासस्य अवस्थानां बहुविकसित सिद्धान्तस्य प्रतिपादनं कृतः कॉलवर्गः प्याजेन प्रतिपादितावस्थायाश्च अग्रे वर्द्धितः तथा तस्य विकासः कृतः। तैः युवककिशोरबालकान् प्रस्तुतनैतिक समस्यानामुत्तरैः कृतः परीक्षितपरिणामः नैतिकविकासस्य सम्पूर्णावस्थायाः व्यवस्थापनस्य रूपे समानितः।

प्रथमस्तरः नैतिकतया पूर्वः
नैतिकमूल्यं बाह्यांशतः शारीरिकक्रियाः अनुपयुक्तकार्येषु वा दृश्यते। बालकाः नियमं प्रति उत्तरदायी भवति तथा संस्थापितमानकानां विश्लेषयति अस्य स्तरस्य द्वे अवस्थे स्तः।
प्रथमावस्था-आज्ञाकारिता दण्डोन्मुखताश्च यः अतिशक्तिशाली प्रतिष्ठा वा समस्यायाः निश्चयीवार्ताभ्यो आत्मकेन्द्रीयसुरक्षा करोति।
द्वितीयावस्था-निश्छल-अहमभावना यत्र सत्कार्यं सोऽस्ति यः यान्त्रिकरूपेण स्वस्य तथा अन्यस्यावश्यकतायाः अपि पूरयति। अस्यां स्वस्य तथा अन्येषामावश्यकतानां मूल्यस्य सापेक्षवादं प्रति जागरुकतोऽपि जायते।

द्वितीयस्तरे भूमिकापुष्टिकरणम्
अस्मिन् स्तरे नैतिकमूल्यैव सत्यकार्यकरणे तथा पारम्परिकक्रमं सुव्यवस्थितकरणे एवञ्च अन्येषामपेक्षायां समावेशयति। इत्यस्मिन् स्तरेऽपि द्वे अवस्थे स्तः।

तृतीयावस्था-शोभनबालक/शोभनबालिकायाः अभिकेन्द्रणं शोभनबालक-बालिकायाः अभिकेन्द्रणस्य आशयो समर्थनरुचिप्रदं तथा अन्येषां साहाय्ये औपचारिकव्यवहारस्य च पुष्टिकरणेन अस्ति।

चतुर्थावस्था-अभिकेन्द्रणं निर्वहनं प्राधिकरणं सामाजिकमान्यतायाश्च आशयः अभिप्रेरणाय कर्तव्यपालनं प्राधिकरणं प्रति सम्मानप्रदर्शनाय तथा स्वहिते अभिज्ञानसामाजिकक्रमं निर्धारणमेवास्ति।

तृतीयस्तरे स्वस्वीकृतनैतिकसिद्धान्तः
अत्र नैतिकता विभज्य मानवाधिकार उत्तरदायित्वेन सह समर्थनो वा प्राधिकराणां प्रतिपुष्टिरूपेण प्रतिपादितवान्। स्तरस्य पुष्टिकरणमान्तरिकरूपेण कमपि कार्यकरणस्य सङ्कल्पोचितानुचितस्य निर्णयोऽथ च अन्तःविचारप्रक्रियोपरि आधारितोऽस्ति। अस्य स्तरस्य द्वे अवस्थे स्तः।

पञ्चमावस्था-संविदात्मकवैधता अभिकेन्द्रणम् उचितानुचितस्य नियमान् संस्थागतनियमान् सन्दर्भैः परिभाषयति। यस्य तर्कसंगताधारः प्रतीयते। यदा व्यक्तिगतनियमानां तथा आवश्यकतानां मध्ये मतभेदोत्पद्यते तर्हि पूर्ववर्ती व्यक्तीनां सद्भावना तथा उत्तरवर्तीव्यक्तीनां विचारशीलायां विश्वसितव्यं यतोहि समाजस्य कल्याणमेवञ्च समुदायस्य अभिलाषार्थमावश्यकोऽस्ति।

षष्ठावस्था-व्यक्तिगतासिद्धान्ताः तथा विवेकाधारितनैतिकता न केवलं स्थायी नियमोपर्याधारितोस्ति, अपितु एकः निर्देशक अभिकर्ता इव विवेकाधारितोपि तदनुसारं कार्यकरणस्य आग्रणयति।

कोहलवर्गस्य नैतिकशिक्षाविषये मतम्
चेतनात्मबोधयोः निर्णये नैतिकशिक्षायाः अतिमहत्त्वमस्ति। कोहलवर्ग स्वशोधपरिणामे नैतिकशिक्षायै प्रयोगं कृतवान् नैतिकविकासमुच्चस्तरप्राप्त्यर्थं विभिन्नकार्यक्रमेषु बलं दत्तवान्। अस्यां प्रणाल्यामध्यापकः छात्रैश्च सहैव कार्यं करोति। निर्णयसमये छात्रस्यापि योगदानं भवति। यः अध्यापकस्य निर्देशेण स्वविकल्पस्य चयनं स्वयं करोति।
अध्यापकः केवलं सहयोगं सर्वप्रथममध्यापकाय एतत् ज्ञातव्यं भवति यत् छात्रः नैतिकतायाः कस्मिन् स्तरे अस्ति। तस्य तार्किकतायां किं विसंगतिः अस्ति, तत्पश्चात् एव छात्रमन्यस्तरे गन्तुं प्रेरयति। कोहलवर्गस्य कार्यक्रमस्य मुख्यबिन्दवः निम्नलिखितानि सन्ति।
1. अध्यापकं छात्रस्य वर्तमाननैतिकस्तरस्य ज्ञानं भवेत्।
2. कक्षायाम् सामान्यनैतिकद्वन्द्वेषु वादविवादं क्रियेत्।
3. अध्यापकं छात्रस्याभ्यान्तरं ज्ञानात्मकमुत्पन्नं क्रियेत् येन सः नैतिकायाः अन्यस्तरे गन्तुं समर्थः भवेत।
4. अध्यापकमुच्चस्तरस्य तार्किकतां छात्रस्य सम्मुखे प्रस्तुतं क्रियेत् येन छात्रः प्रेरितः भवति।
5. विभिन्नकार्यक्रममाध्यमेन कक्षायां नैतिकनिर्णयस्य ज्ञानं प्रदानं करोति।

नैतिकतार्किकता
नैतिकतार्किकतायाः विकास एका प्रक्रियास्ति यत्र व्यक्तिः उचितानुचितयोः निर्णयः चेतनस्तरे नयति। जन्मसमये बालकः नैतिकताविहीनः भवति। प्रारम्भिकबाल्यावस्थायां नैतिकतायाः भावनायाः विकासो भवति। यदा बालकः इदं अनुमीयते यत् किं करणे सति पुरस्कारं मिलति तथा च किं करणे दण्डः। तदा सः शनैः-शनैः ज्ञानं भवति यत् सम्यक् व्यवहारः नैतिकं भवति, अनुचितव्यवहारः अनैतिकं भवति। प्रारम्भे नैतिकमूल्यं तस्मै बाह्यरूपे भवति। शनैः-शनैः स एतत् मूल्यम् आत्मसातं करोति। आत्मसाते 'अहं' अपि सम्मिलितो भवति। अनेन प्रकारेण तस्यात्मबोधं विकसितं भवति तथा च तस्य व्यवहारं नियन्त्रयति। अस्मिन् आधारे एव बालकः सत्यासत्यस्य निर्णयं नेतुं आरम्भयति। अस्य निर्णयस्य पृष्ठभागे तस्य तार्किकताकार्यं करोति। नैतिकतार्किकता कस्मिंश्चिद् परिस्थितौ विभिन्नविकल्पेषु एकं विकल्पं चयनं व्यक्तेः नैतिकनिर्णयस्यस्वरूपं अवबोधयति। इयं तार्किकता दश सार्वभौमिकनैतिकमूल्येषु आधारितः अस्ति यः नैतिकतया सम्बद्धोऽस्ति।

नैतिकविकासप्रभाविकारकाणि
व्यक्तेः नैतिकविकासमनेककारकाः प्रभावयति। जैविकनिर्धारकः सामाजिक-आर्थिकपृष्ठभूमिः तथा बौद्धिककारकाः बालकस्य नैतिकव्यवहारं मुख्यरूपेण प्रभावयति। बालकस्य नैतिकव्यवहारस्य प्रभाविनः किञ्चित् मुख्यकारकाः निम्नवतोस्ति।

1. स्वास्थ्यः
जैविककारकानामन्तर्गतस्वास्थ्यैकः इत्थं कारकोस्ति यः बालकस्य नैतिकं व्यवहारं विशेषरूपेण प्रभावयति, शारीरिकदृष्ट्या स्वस्थक्रियाशीलो वा बालकः प्रायशः वाञ्छनीयव्यवहारमतिशीघ्रात् अभिजानाति।

2. पारिवारिकप्रभावः
परिवारः नैतिक प्रभाविन एकाप्यत्यन्तमहत्त्वपूर्णः तथा शक्तिशाली कारकोस्ति। मातृपितृ एवं परिवारस्य अन्येषां सदस्यानां विचारः बालकस्य नैतिकव्यवहारं प्रभावयति।

3. समूहप्रभावः
बालकः व्यक्तेः वा नैतिक व्यवहारोऽपरि तस्य समूहस्य नैतिकदृष्टिकोणस्याऽपि प्रभावः भवति। समूहः यं कार्यकारणमुचितं विजानाति व्यक्तिरपि तं कार्यमुचितं जानाति।

4. धार्मिकप्रभावः
नैतिकविकासे धर्मः महत्त्वपूर्णभूमिकां प्रस्तौति। बालको धर्मं प्रति यथाधिकं समर्पितो भवति। तस्य नैतिकविकासोऽपि तथैवाधिकः श्रेष्ठो जायते।

5. जनसंचारस्य प्रभावः
ध्वनिविस्तारकयन्त्रचलचित्रदुरदर्शनपुस्तकपत्रपत्रिकादयः जनसंचारस्य साधनोऽपि बालकस्य नैतिकव्यवहारं प्रभावयति।

6. मानसिकयोग्यता
नैतिकविकासं व्यक्तेः मानसिकयोग्यताऽपि प्रभावयति। बुद्धिमतां तथा मूर्खबालकानां नैतिकादर्शः नैतिकमूल्यं नैतिकदृष्टिर्वा भिन्नं-भिन्नं जायते। स्पष्टोऽस्ति यत् व्यक्तेः नैतिकव्यवहारमनेकाः जैविककारकाः सामाजिकार्थिकपृष्ठभूमीनां तथा बौद्धिकक्षमतादयः प्रभावयति। परिवारः तथा विद्यालयस्य सहयोगः बालकानां समूहस्याध्ययनं व्यापकानुभवः सनातन- मूल्यानाम्प्रति सम्मानं तथा मानवकल्याणस्य भावनायाः विकासः अस्यां दिशायां महत्त्वपूर्णयोगदानकर्तुं शक्नोति। इति शम्।

सन्दर्भ ग्रन्थाः
1. नागेन्द्र : (संपादक) मानवीकि पारिभाषिक कोश (मनोविज्ञान ख ण्ड), राजकमल प्रकाशन, दिल्ली, 1968.
2. पाठक, पी. डी. : शिक्षा मनोविज्ञान, विनोद पुस्तक मन्दिर आगरा, संस्करण 33
3. पाण्डेय, के. पी. : नवीन शिक्षा मनोविज्ञान, विश्वविद्यालय प्रकाशन, वाराणसी, 2007.
4. मंगल, एस. के. : शिक्षा मनोविज्ञान, प्रकाश ब्रदर्स, लुधियाना, 1984.
5. माथुर, एस. एस. : शिक्षा मनोविज्ञान, विनोद पुस्तक मन्दिर आगरा, 1997.
6. शर्मा, आर. ए. : शिक्षा अनुसन्धान के मूल तत्त्व और शोध प्रक्रिया, लायल बुक डिपो, मेरठ, 2002.
7. शर्मा, आर. ए. : शिक्षा मनोविज्ञान, लाल बुक डिपो, मेरठ, 2008
8. सरीन एवं सरीन : शैक्षिक अनुसन्धान की विधियाँ, नवीन संस्करण, विनोद पुस्तक मन्दिर आगरा, 1999.